**International Journal of Research in Social Sciences**
Vol. 9 Issue 4, April 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# सामाजिकसञ्चारमाध्यमेषु संस्कृतभाषा

डॉ.कुलदीपसिंहः
सहायकाचार्यः (शिक्षाशास्त्रम्)
ज.रा.राजस्थानसंस्कृतविश्वविद्यालयः
जयपुरम् (राज.)

## सारांशः (Abstract)-

युगमिदं सञ्चारस्य युगं कथ्यते । अस्मिन् युगे ज्ञानस्य सूचनानां च विस्फोट: अतितीव्रगत्या जायमान: अस्ति। अन्तर्जालादिमाध्यमेन एतत् ज्ञानं सर्वासु अपि भाषासु प्रकाशितं भवति। आधुनिकसञ्चारमाध्यमानां समुपयोगेन संस्कृतभाषाया: तद्वैलक्षण्यस्य च प्रचारकार्यम् अपि क्रियमाणम् अस्ति। एतस्मिन् कर्मणि संस्कृतभाषाया: पुरत: नैका: समस्या: अपि आयान्ति, यासां समाधानं संस्कृतज्ञैरेव करणीयम्। पत्रेऽस्मिन् आधुनिकसञ्चारसाधनेषु संस्कृतस्य दशाया: दिशाया: च प्रवर्तनं कृतमस्ति।

## शोधोद्देश्यानि (Outcomes of Research)-

1. सञ्चारस्य स्वरूपं महत्त्वं च निरूप्य तस्य आवश्यकताया: प्रतिपादनम्।
2. विविधेषु सञ्चारसाधनेषु संस्कृतभाषाया: सामग्र्या: विवरणम्।
3. सञ्चारसाधनेषु संस्कृतभाषाया: पुरत: उपस्थितानां समस्यानां समाधानचिन्तनम् ।

## मुख्यांशः (Keywords)-

सञ्चारसाधनानि, मुद्रितमाध्यमा:, इलेक्ट्रॉनिकमाध्यमा:, सामाजिकसञ्चारमाध्यमा:, चलभाषानुप्रयोग:, अन्तर्जालपुटानि, स्वतन्त्रविश्वकोश:।

आधुनिकयुगं सञ्चारक्रान्तियुगरूपेण प्रवर्तमानमस्ति। वर्तमानसञ्चारव्यवस्थाया: सर्वमपि रूपं संस्कृतवाङ्मयनिमित्तं सर्वथा नूतनं नास्ति। संस्कृतविश्वपरिषदः षष्ठाधिवेशनस्य अवसरे शारदापीठस्य पूज्यै: श्रीशंकराचार्यैः सन्देशः प्रादायि यत् -

"संस्कृतभाषामन्तरा कापि भाषा न केवलम् असमृद्धा भवति अपितु जीवितुमेव न शक्नुयात्, तथा संस्कृतभाषां विना न कोऽपि भारतीयो यथार्थभारतीयो भवितुमर्हति । संस्कृतभाषा भारतीयानां जीवनभाषा विद्यते । भारतीयसंस्कृतिः संस्कृतमुपजीवति, अस्याः संस्कृतभाषायाः सञ्चारमाध्यमानां विषये वेदेषु संस्कृतसाहित्ये च अनेकानि उदाहरणानि प्राप्यन्ते तत्र महाभारतयुद्धसमये संजयः कुरुक्षेत्रस्य सजीवं वर्णनं धृतराष्ट्राय अकरोत् यथा

साम्प्रतं दूरदर्शनेन क्रियते । एवमेव कंसः आकाशवाण्या स्वमृत्युविषयिणीं वार्तां श्रुतवान् एव।''

भारते पारम्परिकसञ्चारमाध्यमानां यत्र-तत्र वर्णनं प्राप्यते यथा- मेला, सभा, तीर्थाटनम्। वस्तुतः सञ्चारस्तु त्रिविधः यथा- अन्तर्वैयक्तिकसञ्चारः, समूहसञ्चारः, जनसञ्चारश्चेति । सञ्चारः सामाजिकीकरणस्य प्रमुखमाध्यमो भवति। सञ्चारेणैव सामाजिक-सांस्कृतिकपरम्पराः एकस्मात् वंशक्रमात् वंशान्तरं गच्छन्ति ।

सञ्चारमाध्यमविशेषज्ञेन "मार्शलमैकलुहान इत्याख्येन विदुषा उक्तं- The Medium is the Message अर्थात् किमपि यान्त्रिकसाधनं यत् एककालावच्छेन बहुभ्यः जनेभ्यः संन्देशं प्रेषयेत्, तदेव सञ्चारसाधनं भवति ।"

वस्तुतः सञ्चारस्योपयोगः तथ्यानां, भावनानां, संवेगानां, विचाराणां, दृष्टिकोणानाञ्च विनिमयार्थं क्रियते ।

सञ्चारस्य सूचनाप्रसारस्य च अनेके माध्यमाः सन्ति तत्र पत्रिकाः, पुस्तकानि, वार्तापत्राणि च पारम्परिकमाध्यमेषु अन्तर्भवन्ति । प्रसारदृष्ट्या यद्यपि मुद्रितसाधनानां काचित् सीमा भवति तथापि संस्कृतस्य प्रचाराय एतेषां मुद्रितसाधनानां महद्योगदानं वर्तते ।

साम्प्रतिके सञ्चारयुगेऽस्मिन् पारम्परिकसञ्चारमाध्यमानामुपयोगे महत्परिवर्तनं जातम्। अन्तर्जालाधारितपत्रिकाः, अन्तर्जालपुटानि, ई-ग्रन्थाः, यूट्यूब, फेसबुक, ट्विटर इत्यादयः सञ्चारमाध्यमाः कनिष्ठिकाधिष्ठितास्सन्ति । संस्कृतभाषायामपि एते माध्यमाः उपयुज्यन्ते ।

संस्कृतसाहित्यस्य पिपठिषूणाङ्कृते मुद्रितमाध्यमाः (Print Media) इलेक्ट्रोनिकप्रसारमाध्यमाः (Electronic Broadcast Media) वैश्विकान्तर्जालम् (World Wide Webs) सामाजिकसञ्चारसाधनानि (Social Media) चलभाषानुप्रयोगाः (Mobile Apps) इत्यादिषु संस्कृतनिष्ठा सामग्री समुपलभ्यते । मुद्रितसञ्चारमाध्यमेषु काशीविद्यानिधिः "पण्डितः" इति संस्कृतस्य प्रथमा मासपत्रिका मन्यते तदनन्तरं सुधर्मा, गाण्डीवम्, संस्कृतसंवादः, सम्भाषणसन्देशः चेत्यादिरूपेण नैकाः पत्रिकाः प्रकाशिताः।

साम्प्रतं सम्भाषणसन्देशः, चन्दमामा चेति वैशिष्ट्यं बिभृतः। प्राचीप्रज्ञा, सुधर्मा, जाह्नवी चेत्यादीनां ई-पत्रिकाणां डिजिटल-प्रकाशनमपि जातम् । एवमेव दैनिकसंस्कृत-वार्तापत्राणि अपि प्रकाशने आगतानि। तेषु सुधर्मा, विश्वस्य वृत्तान्तः, सृजनवाणी, नवप्रभातं चेत्यादीनि प्रमुखानि सन्ति । एतदतिरिच्य साप्ताहिकसंस्कृतपत्रिकाः, पाक्षिकसंस्कृतपत्रिकाः, मासिकपत्रिकाः, द्वैमासिकपत्रिकाः, त्रैमासिकपत्रिकाः, षाण्मासिकपत्रिकाः, वार्षिकपत्रिकाश्चेति अशीत्यधिकाः प्रकाशिताः भवन्ति ।

**वैद्युदाण्विकी (Electronics) सञ्चारमाध्यमेषु संस्कृतम्-**

वैद्युदाण्विक्यां रेडियो दूरदर्शनञ्चेति साधनद्वयं प्रसिद्धम् ।

1. रेडियोद्वारा चतुर्नवत्यधिकैकोनविंशतितमे वर्षे साप्ताहिकसंस्कृतवार्ताणां प्रसारणं समारब्धम् ।
2. नवनवत्यधिकैकोनविंशतितमे वर्षे दूरदर्शने "वार्ताः" इति नाम्ना संस्कृतभाषया दैनिकप्रसारणं समारब्धम् तच्च प्रतिदिनं प्रातः पञ्चोनसप्तवादने आगच्छति ।

पञ्चदशाधिकद्विसहस्रतमात् वर्षात् दूरदर्शनस्य राष्ट्रवाहिन्यां (National Channel) "वार्तावली" इत्याख्यः कार्यक्रमः प्रवर्तते । ज्ञानदर्शन इति वाहिन्यां "भाषामन्दाकिनी" इति संस्कृतभाषायाः कार्यक्रमस्य प्रसारणं मध्याह्ने द्विवादने भवति । आकाशवाण्यां प्रतिदिनं प्रातः सायञ्च दैनिकवार्तायाः प्रसारणं भवति ।

**अन्तर्जालमाध्यमेषु संस्कृतम्-**

संस्कृतपाठ्यवस्तूनां प्रसारदृष्ट्या अन्तर्जालम् अत्यन्तमुपकरोति । अस्मिन् ई-ग्रन्थाः, ई-पत्रिकाः, शोधलेखाः, कथाः, प्रतिवेदनानि, व्याख्यानानि, संस्कृतगीतानि, संस्कृतस्तोत्राणि, संस्कृतसम्भाषणशिक्षणम्, शिक्षणानुवर्गाः च अत्र समुपलभ्यन्ते, येषां यथायोग्यमुपयोगं कर्तुं शक्नुमः। संस्कृतचलच्चित्राणामपि अवलोकनं अत्र सहजतया भवितुमर्हति । अन्तर्जाले संस्कृत-विकिपीडिया (स्वतन्त्रविश्वकोशः) अपि वर्तते, यत्र दशसहस्रेभ्यः अपि अधिकलेखाः प्रदर्शिताः सन्ति । अत्र बहुविधानि शृङ्खलितान्यपि (Links) प्राप्यन्ते "यूनिकोड" लिपिप्रयोगेण यथेष्टशब्दस्य अन्वेषणमपि कर्तुं शक्यते ।

**सामाजिकसञ्चारमाध्यमेषु संस्कृतम्-**

सामाजिकसञ्चारमाध्यमाः सूचनायाः सम्प्रेषणस्य प्रवाहकाः भवन्ति। उपर्युक्तेषु माध्यमेषु समाजे सम्प्रेषणं कर्तुं सूचनां च प्रेषयितुं सामाजिकसञ्चारमाध्यमाः गौरवं बिभ्रति । एतेषु यूट्यूब, व्हाट्स् एप, फेसबुक, ट्विटर, ब्लॉग, इन्स्टाग्राम चेत्यादयः माध्यमाः प्रमुखाः सन्ति। माइक्रोसॉफ्ट टीम, जूम, गूगलमीट चेत्यादयः सामाजिकमाध्यमाः साम्प्रतम् उपयुज्यन्ते यत्र सजीवप्रसारणेन सह परस्परम् अन्त:क्रियामपि कर्तुं शक्नुमः। अस्यां कोरोनाविषाणुमहाव्याधौ एतेषां माध्यमानां समुपयोगः अतितरां दृश्यते । संस्कृतज्ञाः अपि उपर्युक्तैः माध्यमैः स्वविषयम् उपस्थापयन्ति येन छात्राः जनसामान्याश्च लाभान्विताः भवन्ति । इतोऽपि संस्कृतशिक्षायाम् एतान् माध्यमान् उपयुज्य ज्ञानस्य प्रसारणं कर्तुं शक्यते तद्यथा-

1. संस्कृतवाङ्मये निहितस्य ज्ञान-विज्ञानस्य अनुसन्धानार्थम् ।
2. शास्त्रीयविषयाणां चर्चायाः कार्यक्रमाणामायोजनाय ।
3. संस्कृतक्षेत्रे समसामयिकसूचनानां प्राप्त्यर्थम् ।
4. संस्कृतसम्भाषणकौशलस्याभिवृद्ध्यर्थम् ।

**चलभाषानुप्रयोगेषु संस्कृतम् (Mobile App)-**

साम्प्रतं प्रत्येकं क्षेत्रे चलभाषानुप्रयोगाणां प्रयोगः जायमानः अस्ति । अस्माकं संस्कृतज्ञाः व्यक्तिगतस्तरे संस्थानिकस्तरे च संस्कृतभाषया चलभाषानुप्रयोगाणां निर्माणं कृतवन्तः कुर्वन्तश्च सन्ति । वाचस्पत्यम्, अमरकोशः, अष्टाध्यायी, सचित्रसंस्कृतप्रहेलिका, संस्कृतभाषितमाला, नमोनमः, संस्कृतगङ्गा, भगवद्गीता, संस्कृतव्याकरणम्, संस्कृतसन्धिः चेत्यादयः अनेके चलभाषानुप्रयोगाः प्राप्यन्ते ।

**सामाजिकसञ्चारमाध्यमेषु संस्कृतभाषायाः दिशा-**

1. केचन अन्तर्जाले विद्यमानान् शोधलेखान् Cut, Paste इति कृत्वा अनुचितरीत्या (Plagiarism) शीर्षकान्तरेण स्वनाम्ना यत्र तत्र प्रकाशयन्ति ।
2. सामाजिकसञ्चारमाध्यमेषु विद्यमानायाः संस्कृतसम्बद्धायाः सामग्र्याः प्रामाणिकतायाः विषये संशयो भवति, अतः संस्कृतज्ञैः सह सम्भूय प्रामाणिकसामग्री स्थापनीया ।
3. संस्कृतविश्वविद्यालयानां पुस्तकालयेषु विद्यमानाः दुर्लभग्रन्थाः अङ्कीयरूपेण (Digitally) संरक्षणीयाः। केचन संस्कृतविश्वविद्यालयाः अनेन प्रकारेण ग्रन्थान् अन्तर्जाले स्थापयन्तः अपि सन्ति ।
4. संस्कृतविषयिणी सामग्री पुष्कलतया अन्तर्जाले प्राप्यते। संस्कृतकार्यम् अपि यथासमयं प्रसार्यन्ते, परं तत्र दिदृक्षूणाम् अत्यल्पतया संस्कृतकार्यक्रमाणां TRP (Target Rating Point) एव अप्राप्तं भवति। अतः अस्यां दिशि अस्माभिः विशेषतया प्रयत्नो विधेयः। एतदर्थं श्रोतृगणस्य निर्माणेन सह कार्यक्रमाणां प्रचारः अपि विधातव्यः।
5. अस्माकं सर्वोऽपि इतिहासः संस्कृतवाङ्मये निहितो वर्तते। अस्माकम् इतिहासे वास्तविकतथ्यानि योजनीयानि अथवा वास्तविकतथ्यानि आश्रित्य इतिहासस्य पुनर्लेखनं संस्कृतज्ञानामेव कार्यम् ।
6. संस्कृतच्छात्रेषु आत्मगौरवस्य भावः सम्पादनीयः। ते अन्येभ्यः अवरतानुभूय सीदन्ति इत्यतः ते सकारात्मकवचोभिः अनुकूलवार्तया च प्रेरणीयाः।
7. संस्कृतस्य दुरूहविषयाणां व्याख्यानानि सञ्चित्य तेषां प्रसारणं भवेत् ।

**संदर्भाः-**

1. त्रिपाठी, राधावल्लभः (2012) षष्ट्यब्दसंस्कृतम् (Sixty Years of Sanskrit Studies, Vol.1 India) राष्ट्रियसंस्कृतसंस्थानम् नवदेहली ।
2. त्रिपाठी, राधावल्लभः (2012) षष्ट्यब्दसंस्कृतम् (Sixty Years of Sanskrit Studies, Vol.2 Countries other than India) राष्ट्रियसंस्कृतसंस्थानम् नवदेहली ।
3. मिश्र, अभिराज राजेन्द्र (2016) नई सहस्राब्दी में संस्कृत, अक्षयवट प्रकाशन, इलाहाबाद ।

4. चेतना (2008) राजस्थाने संस्कृतपत्रकारिता, स्वामी मोहनदास सेवा समिति, जयपुर ।
5. आङ्ग्लसंस्कृतसङ्गणककोशः, सङ्कलनकर्ता श्रीकान्तः जमदग्निः, समीक्षकः डॉ.श्रीनिवास बरखेडी ।